10-06-2021

संस्कृतसामान्यम्। उपशास्त्री II

अनिवार्यपत्रम् । हितोपदेशे संस्कृतश्लोकव्याख्या।

"अर्थाऽऽगमो नित्यमरोगिता च, प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षड् जीवलोकस्य सुखानि राजन्॥"

श्लोकोऽयं महाकविना श्रीनारायणपण्डितेन विरचितस्य हितोपदेशस्य मित्रलाभप्रकरणात् उद्धृतः अस्ति। गङ्गातटे अवस्थितस्य पाटलीपुत्रनगरस्य राज्ञः सुदर्शनस्य पुत्राः मूर्खाः आसन्। तस्मात् कारणात् राजा सुदर्शनः अतीव दुःखी आसीत्। एतस्मिन् अवस्थायां एकदा राजा सुखदुःखयोः उपरि विचारम् अकरोत्। सः नृपः विचारयति– कानि कतिपयानि च सुखानि सन्ति? सः अनुभवति यत् षड् सुखानि जीवलोके सन्ति। यदि कोऽपि जनः स्वस्थः अस्ति, तस्य गृहे अर्थाभावः न वर्तते, तस्य पत्नी तस्मै हृद्या प्रियवादिनी चास्ति, पुत्राः अनुकूलाः सन्ति, तस्य जनस्य विद्या अर्थकरी (धनदा) अस्ति, तदा स जनः सुखी भवति।

शब्दार्थः→ नित्यं = निर्बाधः। अर्थागमः = धनागमः। आरोगिता = शरीरसौख्यम्, स्वास्थ्यम्। प्रियवादिनी = मधुरभाषिणी। प्रिया = हृद्या। वश्यः = अनुकूलः। अर्थकरी = धनकरी। षड् = षट् संख्याकाः। जीवलोकस्य = मर्त्यलोकस्य। सुखानि = सुखावहानि, आनन्दाः। पुत्रः = आत्मजः, तनयः।

10-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ।
का० सिं० द० सं० वि० वि० दरभङ्गा।

अनिवार्यपत्रम् ।   शास्त्री II   10-06-2021

व्याकरणछात्र हेतु; साहित्यम् ।   रघुवंशम् ।   श्लोकव्याख्या ।

॥ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः॥

**सन्दर्भः** → कविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमती-स्वयंवरवर्णनायुद्धृतमस्ति पद्यमिदम् ।

**प्रसङ्गः** → अत्र सुनन्दा इन्दुमतीं प्रति नीपकुलजातस्य राज्ञः सुषेणस्य परिचयं सोपमं वर्णयति ।

**अन्वयः** → यज्वा एष पार्थिवः नीपान्वयः यम् आश्रित्य गुणैः शान्तं सिद्धाश्रमम् एत्य सत्वैः इव नैसर्गिकः अपि परस्परेण विरोधः उत्ससृजे ।

**शब्दार्थः** व्याकरणञ्च → यज्वा = यज्ञकर्ता । एषः = अयम् । पार्थिवः → पृथिव्या ईश्वरः = राजा, नृपः । नीपान्वयः → नीप एव अन्वयो यस्य सः = नीपकुलजः, नीपकुलोत्पन्नः । यम् = सुषेणं राजानम् । आश्रित्य → आ + √श्रि + ल्यप् = शरणं गत्वा । गुणैः = सत्यज्ञानादिभिः । शान्तम् = निर्विकारस्वरूपम् । सिद्धाश्रमम् = तपोवनम् । एत्य = प्राप्य । सत्वैः = हिंस्रजीवैः । इव = यथा । नैसर्गिकः - स्वाभाविकः । अपि = एवम् । परस्परेण = मिथः, इतरेतर । विरोधः = शत्रुभावः । उत्ससृजे = परित्यक्तः ।

**तात्पर्यः** → सुनन्दानुसारेण एष यज्ञकर्ता नीपवंशजः राजा सुषेणः अस्ति, यं प्राप्य ज्ञानादिगुणाः परस्परविरोधस्वभावं तथैव परित्यक्तवन्तः यथा तपोवने हिंस्रजीवाः सर्वं वैरभावं परित्यज्य विचरन्ति इति भावः ।

**विशेषः** → अत्र शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तञ्च ।

10-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्य) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

10-06-2021

साहित्यप्रतिष्ठा । शास्त्री - III

अष्टम पत्रम् । मालविकाग्निमित्रे श्लोकव्याख्या ।

"कान्तां विचिन्त्य सुलभेतरसंप्रयोगां, श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातपे इवाभिहतं सरोजं, दुःखायते मम मनः सुखमश्नुते च ॥"

प्रसङ्गादिःपूर्ववत् । श्लोकोऽयं पञ्चमाङ्कात् गृहीतः ।

अन्वयः → कान्तां सुलभेतरसम्प्रयोगाम् विचिन्त्य विदर्भपतिम् बलैः आनमितम् श्रुत्वा च आतपे धाराभिः अभिहतम् सरोजम् इव हृदयम् दुःखायते च सुखम् अश्नुते ।

शब्दार्थाः व्याकरणानि च → कान्ताम् = मालविकाम् । सुलभेतरसम्प्रयोगाम् → सुलभात् इतरः सम्प्रयोगः यस्याः सा, ताम् = दुर्लभसमागमाम् । विचिन्त्य → वि+√चिन्त् +ल्यप् = विभाव्य । विदर्भपतिम् → विदर्भस्य पतिम् = यज्ञसेननामकं राजानम् । बलैः = सेनाभिः । आनमितम् = नम्रीकृतम् । श्रुत्वा → √श्रु + क्त्वा = आकर्ण्य । आतपे = सूर्यरश्मिविषये । धाराभिः = वर्षाभिः । अभिहतश्च = ताडितश्च । सरोजम् = कमलम् । इव = सदृशम् । दुःखायते = खेदमनुभवति । हृदयम् = मनः । सुखमश्नुते = आनन्दं चाधिगच्छति ।

अलङ्कारः → विषमः ।

छन्दः → वसन्ततिलका । "उक्ता वसन्ततिलका तभजा जगौ गः"।

10-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्यः ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

साहित्यम् । शास्त्री I 10-06-2021

शिशुपालवधस्य श्लोकव्याख्या ।

" रथाङ्गपाणेः पटलेन रोचिषाम् ऋषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरोः तुषारमूर्तेरिव नक्तमंशवः ॥"

श्लोकोऽयं महाकविमाघविरचितस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गात् उद्धृतः अस्ति । अत्र कविः सुवर्णसिंहासनाधिरूढस्य श्रीकृष्णस्य तथा मुनेः नारदस्य तेजांसि चन्द्रकिरणैः तुल्यत्वं वर्णयति ।

अन्वयः → रथाङ्गपाणेः रोचिषां पटलेन संवलिताः ऋषित्विषः नक्तं तरोः चलत्पलाशान्तरगोचराः तुषारमूर्तेः अंशवः इव विरेजिरे ।

व्याख्या → रथाङ्गपाणेः → रथस्य अङ्गम् रथाङ्गम्, पाणौ यस्य सः रथाङ्गपाणिः, तस्य रथाङ्गपाणेः (चक्रपाणेः, श्रीकृष्णस्य) ।

रोचिषाम् → तेजसाम् । पटलेन → समूहेन । संवलिताः → मिलिताः । ऋषित्विषः → ऋषेः त्विषः, मुनितेजांसि । नक्तम् → रात्रौ । तरोः → वृक्षस्य । चलत्पलाशान्तरगोचराः → चलन्तः ये पलाशाः चलत्पलाशाः, तेषाम् अन्तराणि गोचराः, येषाम् ते । तुषारमूर्तेः → सुधांशोः । अंशवः → किरणाः । विरेजिरे – शुशुभिरे ।

भावार्थः → चक्रपाणेर्भगवतः श्रीकृष्णस्य श्यामवर्णकान्तिसमूहेन मिश्रितस्य ऋषेर्नारदस्य शुभ्रवर्ण तेजः रात्रौ वायुप्रकम्पिततरुपर्णमध्यप्रविष्ट चन्द्रकिरणवत् शुशुभे ।

अस्मिन् श्लोके उपमालङ्कारः । उत्प्रेक्षालङ्कारः अपि ।

लक्षणानि → साधर्म्यमुपमा भेदे । संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

वंशस्थवृत्तम् → जतौ तु वंशस्थमुदीरितं जरौ ।

10-06-21

डॉ० निर्मलकुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ